# Bhagya Suktam or Pratah Suktam

# भाग्यसूक्तम् अथवा प्रातः सूक्तम्

## Document Information

Text title : bhAgyasUkta or Pratah Suktam

File name : bhAgyasUktam.itx

Category : veda, svara, sUkta

Location : doc_veda

Proofread by : Palak

Source : https://sanskritdocuments.org/mirrors/rigveda/e-text.htm

Latest update : October 8, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2023

*sanskritdocuments.org*

# भाग्यसूक्तम् अथवा प्रातः सूक्तम्

ऋग्वेदसंहितायां सप्तमं मण्डलं, एकचत्वारिंशं सूक्तम् ।
ऋषिः - वसिष्ठः, देवता- १ लोङ्गोक्ताः, २-६ भगः, ७ उषाः,
छन्दः - १ निचृज्जगती, २, ३, ५, ७, निचृत्त्रिष्टुप्, ४ पङ्क्तिः, ६ त्रिष्टुप्
स्वरः - १ निषादः, २, ३, ५-७ धैवतः, ४ पञ्चमः ।

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥ ७.०४१.०१
प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ ७.०४१.०२
भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥ ७.०४१.०३
उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन्सूर्यस्य वयं देवानां सुमतौ स्याम ॥ ७.०४१.०४
भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ॥ ७.०४१.०५
समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु ॥ ७.०४१.०६
अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥ ७.०४१.०७

(यो माऽग्ने भागिनगं सन्तमथाभागं चिकीऋषति ।
अभागमग्ने तं कुरु मामग्ने भागिनं कुरु ॥
ॐ शान्तिः शान्तिः शान्तिः ।)

स्वररहितम् ।

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥ ७.०४१.०१
प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ ७.०४१.०२
भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥ ७.०४१.०३
उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन्सूर्यस्य वयं देवानां सुमतौ स्याम ॥ ७.०४१.०४
भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ॥ ७.०४१.०५
समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु ॥ ७.०४१.०६
अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥ ७.०४१.०७

(यो माऽग्ने भागिनगं सन्तमथाभागं चिकीऋषति ।
अभागमग्ने तं कुरु मामग्ने भागिनं कुरु ॥

ॐ शान्तिः शान्तिः शान्तिः ।)

The complete bhAgyasUktam includes the following

ऋग्वेदसंहितायां अष्टमं मण्डलं, सप्तचत्वारिंशं सूक्तम् ।
ऋषिः - वसिष्ठः, देवता- १४-१८ आदित्याउषाश्च,
छन्दः - १५, १६, १८,भुरिक्त्रिष्टुप्, १७ स्वराड्त्रिष्टुप्, १४ त्रिष्टुप्
स्वरः - १४-१८ धैवतः ।

यच्च गोषु दुष्ष्वप्न्यं यच्चास्मे दुहितर्दिवः ।
त्रिताय तद्विभावर्याप्त्याय परा वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८.०४७.१४
निष्कं वा घा कृणवते स्रजं वा दुहितर्दिवः ।
त्रिते दुष्ष्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८.०४७.१५
तदन्नाय तदपसे तं भागमुपसेदुषे ।

त्रिताय च द्विताय चोषो दुष्ष्वप्न्यं वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८.०४७.१६
यथा कलां यथा शफं यथ ऋणं संनयामसि ।
एवा दुष्ष्वप्न्यं सर्वमाप्त्ये सं नयामस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८.०४७.१७
अजैष्माद्यासनाम चाभूमानागसो वयम् ।
उषो यस्माद्दुष्ष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८.०४७.१८

ऋग्वेदसंहितायां दशमं मण्डलं, चतुःषष्ट्युत्तरशततमं सूक्तम् ।
ऋषिः - प्रचेताः, देवता दुःस्वप्नघ्नम्,
छन्दः - ५ पङ्क्तिः, स्वरः - ५ पञ्चमः ।

अजैष्माद्यासनाम चाभूमानागसो वयम् ।
जाग्रत्स्वप्नः संकल्पः पापो यं द्विष्मस्तं स ऋच्छतु यो नो द्वेष्टि तमृच्छतु ॥ १०.१६४.०५

हरिः ॐ ।

स्वररहितम् ।

यच्च गोषु दुष्ष्वप्न्यं यच्चास्मे दुहितर्दिवः ।
त्रिताय तद्विभावर्याप्त्याय परा वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८.०४७.१४
निष्कं वा घा कृणवते स्रजं वा दुहितर्दिवः ।
त्रिते दुष्ष्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८.०४७.१५
तदन्नाय तदपसे तं भागमुपसेदुषे ।
त्रिताय च द्विताय चोषो दुष्ष्वप्न्यं वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८.०४७.१६
यथा कलां यथा शफं यथ ऋणं संनयामसि ।
एवा दुष्ष्वप्न्यं सर्वमाप्त्ये सं नयामस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८.०४७.१७
अजैष्माद्यासनाम चाभूमानागसो वयम् ।
उषो यस्माद्दुष्ष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८.०४७.१८

अजैष्माद्यासनाम चाभूमानागसो वयम् ।
जाग्रत्स्वप्नः संकल्पः पापो यं द्विष्मस्तं स ऋच्छतु यो नो द्वेष्टि तमृच्छतु ॥ १०.१६४.०५

हरिः ॐ ।

The initial portion is also referenced as

taittarIya brAhmaNam aShTakam 2, prashnaH 8, anuvAka 9
in the mantrapuShpam book.

*Bhagya Suktam or Pratah Suktam*

pdf was typeset on August 14, 2023

Please send corrections to *sanskrit@cheerful.com*